# ।। श्रीभार्गवकवचम् ।।

।। श्री गणेशाय नमः ।।

श्रीनारायण उवाच ।
कैलासशिखरे रम्ये शंकरं लोकशंकरम् ।
कैवल्यचरणं गौरी पप्रच्छ हितमद्भुतम् ।।१।।

पार्वत्युवाच ।
देवदेव महादेव देवेश वृषभध्वज ।
त्वत्तः श्रुतान्यशेषाणि जामदग्न्यस्य साम्प्रतम् ।।२।।

हरेरंशावतीर्णस्य मन्त्रयन्त्रादिकान्यलम् ।
न श्रुतं कवचं देव न चोक्तं भवता मम ।।३।।

वक्तुमर्हसि देवेश भक्तायै गुह्यमप्युत ।
इति पृष्टः स गिरिशो मन्त्रयन्त्राङ्गतत्त्ववित् ।।४।।

उवाच प्रहसन्देवीं हिताय जगतामिदम् ।
रहस्यमपि हि ब्रूयुर्लोकैकहितदृष्टयः ।।५।।

शिव उवाच ।
श्रृणु प्रिये प्रियमिदं मम गुह्यतरं परम् ।
धर्मार्थकाममोक्षाणामनायासं सुसिद्धिदम् ।।६।।

एकमौपयिकं मन्ये विष्णुवक्षःस्थलालयाम् ।
श्रियमाक्रष्टुकामानामिदं कवचमुत्तमम् ।।७।।

एकातपत्रसहितां य इच्छेत्सागराम्बराम् ।
स जामदग्न्यकवचं नित्यमावर्तयेन्नरः ।।८।।

उद्दण्डशस्त्रदोर्दण्डप्रचण्डरिपुमण्डलम् ।
कथं जयेयुर्वीरेन्द्राः कवचानावृताङ्गकाः ।।९।।

परप्रयुक्तकृत्यौदिदोपा भूतादयोऽपि वा ।
प्रयान्ति भीता रामस्य वर्मणा वीक्ष्य रक्षितम् ।।१०।।

कैमन्यैः कवचैर्देवि किमन्यैर्मनुभिश्च वा ।
जामदग्न्यः परं  यस्य दैवतं भृत्यवत्सलः ।।११।।

कवचस्यास्य गिरिजे ऋष्यादिन्यासकल्पनम् ।
मूलमन्त्रोक्तविधिना कारयेत्साधकोत्तमः ।।१२।।

(अस्य श्रीभार्गवकवचस्तोत्रमन्त्रस्य )

अङ्गिरा ऋषिः । बृहती छन्दः । श्रीमाञ्जामदग्न्यो देवता ।
(श्रीभार्गवरामप्रीत्यर्थे भार्गवकवचस्तोत्रजपे विनियोगः ।

अथ करन्यासः ।

रां रामाय नमः अङ्गुष्ठाभ्यां नमः ।
रां रामाय नमः तर्जनीभ्यां नमः ।
रां रामाय नमः मध्यमाभ्यां नमः ।
रां रामाय नमः अनामिकाभ्यां नमः ।
रां रामाय नमः कनिष्ठिकाभ्यां नमः ।
रां रामाय नमः करतलकरपृष्ठाभ्यां नमः ।

अथ षडङ्गन्यासः ।
रां रामाय नमः हृदयाय नमः
रां रामाय नमः शिरसे स्वाहा ।
रां रामाय नमः शिखायै वषट् ।
रां रामाय नमः कवचाय हुम् ।
रां रामाय नमः नेत्रत्रयाय वौषट् ।
रां रामाय नमः अस्त्राय फट्

अथ ध्यानम् ।
उद्दोर्दण्डचलत्त्कुठारशिखरस्फारस्फुलिङ्गाङ्कुर-
व्रातामोघमहास्त्रनाशितजगद्विद्वेषिवंशाटवीम् ।
वन्दे भार्गवमुग्रकार्मुकधरं शान्तं प्रसन्नाननं
वीरश्रीपरिचुम्ब्यमानमहितस्वब्रह्मतेजोनिधिम् ।।१३।।

ॐ जामदग्न्यः शिरः पातु पातु मूर्धानमूर्ध्वदृक् ।
ललाटं ललितः पातु भ्रुवौ भृत्यार्तिनाशनः ।।१४।।

श्रवसी सुश्रवा मेऽव्यात्कर्णौ कर्णान्तलोचनः ।
नेत्रे गोत्रार्तिहा मेऽव्याल्लोचने भवमोचनः ।।१५।।

गण्डे मे खण्डपरशुः कपोलौ पातु शीलवान् ।
नासे सुनासः पायान्मे नासिके दासवत्सलः ।।१६।।

रसनां रसरूपोऽव्याद्रसज्ञां रेणुकासुतः
अधरौ पातु मे नित्यमधरीकृतशात्रवः ।।१७।।

वक्त्रं चित्रचरित्रोऽव्याद्दन्तान्दन्तीन्द्रविक्रमः ।
चुबुकं रिपुजित्पातु ग्रीवां श्रीवत्सलाञ्छनः ।।१८।।

स्कन्धौ मे स्कन्दविजयी कक्षे मे क्षत्रियान्तकः ।
भुजौ मे सततं पातु सहस्त्रभुजशासनः ।।१९।।

करौ हितकरः पातु पाणी क्षोणीभरापहः ।
अङ्गुलीर्मङ्गलगुणो नखानि मखकृन्मम् ।।२०।।

वक्षः पातु ममाभीक्ष्णं क्षतजाभिषवप्रियः ।
उरः पुरुषवीरो मे पार्श्वौ पातु परश्वधी ।।२१।।

उदरस्थजगत्पायादुदरं मम सर्वदा ।
भयापहोऽव्यान्नाभिं मे मध्यं निध्यातविष्टपः ।।२२।।

लिङ्गं शंकरशिष्योऽव्यादुपस्थं निस्तुलप्रभः ।
पाय्वपानं च मे पायात्सायकासनवान्सदा ।।२३।।

त्रिःसप्तकृत्वःकुलहा त्रिकं मेऽवतु सर्वदा ।
परमेष्ठ्यवतात्पृष्ठं पिठरं दृढविक्रमः ।।२४।।

ऊरु मेरुसमः पातु जानू मे जगतां पतिः ।
जङ्घे संघातहन्ताव्यात्प्रपदे विपदान्तकः ।।२५ ।।

पादौ मे पादचार्यव्याच्चरणौ करुणानिधीः ।
पादाङ्गुलीः पापहा मे पायात्पादतले परः ।।२६।।

परश्वधधरः पायाद्रामः पादनखानि मे ।
पूर्वाभिभाषी मां पायात्पूर्वस्यां दिशि संततम् ।।२७।।
दक्षिणस्यामपि दिशि दक्षयज्ञान्तकप्रियः ।
पश्चिमस्यां सदा पायात्पाश्चात्याम्बुधिमर्दनः ।।२८।।

वित्तेशरक्षिताशायां पायान्मां सत्तमार्चितः ।
सर्वतः सर्वजित्पायान्ममाङ्गानि भयात्प्रभुः ।।२९।।

मनो महेन्द्रनिलयश्चित्तं मे दृप्तनाशनः ।
बुद्धिं सिद्धार्चितः पायादहंतामनहंकृतिः ।।३०।।

कर्माणि कार्तवीर्यारिर्हेलां हैहयवंशहा ।
हरत्वमोघदृङ्मोहं क्रोधं च क्रोधदर्पाहा ।।३१।।

श्रियं करोतु मे श्रीशः पुष्टिं मे पुष्टिवर्धनः ।
संतानं सततं दद्याद्भृगुसंतानभूरूहः ।।३२।।

आयूंषि मे वितनुतादार्यः परमपूरषः ।
आशां मे पूरयत्वाशु कश्यपार्पितविष्टपः ।
श्रीमान्परशुरामो मां पातु सर्वात्मना सदा ॐ ।।३३।।

इत्येतत्कवचं दिव्यमभेद्यं मन्त्रयन्त्रिभिः ।
कथितं देवि ते गुह्यं प्रियेति परमाद्भुतम् ।।३४।।

न नास्तिकाय नादात्रे न चाश्रद्धालवे प्रिये ।
देयान्नाविनीतायैतन्नाभक्ताय कदाचन ।।३५।।

नाजापकाय नाज्ञात्रे नासत्यवचसे क्वचित् ।
नामालामन्त्रिणे देवि प्रदेयं नाप्यमन्त्रिणे ।।३६।।

देयं श्रद्धालवे भक्त्या प्रणताय नतात्मने ।

गुणान्विताय शुद्धाय मन्त्रगोप्त्रे च मन्त्रिणे ।।३७।।

अवश्यमेतज्जप्तव्यं त्रिसन्ध्यं नियमान्वितैः ।
मन्त्रावसाने मन्त्रज्ञै रचितं मन्त्रसिद्धये ।।३८।।

वर्मैतच्च जपेन्मन्त्री जपेद्वा सततं मनुः ।
आसेचितादिव तरोर्फलं नान्पोति सद्रसम् ।।३९।।

जयकामो भूर्जपत्रे रक्तबिन्दुभिरुज्ज्वलैः ।
लिखित्वावर्तयेद्रात्रौ कवचं शतसंख्यया ।।४० ।।

संपूज्य धूपदीपाद्यैर्ध्यात्वा च हृदि भार्गवम् ।
हस्ते बध्वा रणं गत्वा विजयश्रियमान्पुयात् ।।४१।।

एवं संप्रस्थितस्यास्य विद्यावादे रणेऽपि वा ।
वाचस्पतिर्वा शक्रो वा वश्यः स्यात्किमुतापरे ।।४२।।

अथवा तिलकं कृत्वा रक्तक्षोदेन भामिनि ।
कवचेनाभिजप्तेन गच्छञ्जयमवान्पुयात् ।।४३।।

श्रीकामस्तु महेन्द्राद्रेर्द्रोणिं गत्वा मनोहराम् ।
तत्र मण्डलमास्थाय चण्डभानुं विलोकयन् ।।४४।।

जपेदिदं महद्वर्म प्रत्यहं शतसंख्यया ।
मण्डलान्ते श्रियं श्रेष्ठां लभते भार्गवाज्ञया ।।४५।।

सिद्धयो विविधास्तस्य दिव्यज्योतिर्लतालयः ।
सिध्यन्ति सिद्धवन्द्यस्य कृपया विस्मयावहाः ।।४६।।

भूतप्रेतपिशाचाश्च रोगाश्च विविधाशुभाः ।
दुष्टा नृपास्तस्कराश्च व्याघ्रसिंहगजादयः ।।४७।।

श्रीमद्भृगुकुलोत्तंसदंशदंशितमद्रिजे ।
दृष्ट्वैव हि पलायन्ते मृत्युं दृष्ट्वैव हि प्रजाः ।।४८।।

जामदग्न्यस्य यो वाञ्छेत्सान्निध्यं योगिदुर्लभम् ।
दारिद्यदुःखशमनं संसारभयनाशनम् ।।४९।।

स महेन्द्रस्य शिखरे स्नात्वोपस्थाय भास्करम् ।
तन्मध्यवर्तिनं शान्तं जटामण्डलमण्डितम् ।।५०।।

परश्वधधनुर्दण्डराजितांसद्वयान्वितम् ।
अक्षसूत्रं सुबिभ्राणं दक्षिणेऽङ्गुलिपल्लवे ।।५१।।

वामजानुतलन्यस्तवामपाणिकुशेशयम् ।
उन्मज्जज्जलजग्रीवमामीलितविलोचनम् ।।५२।।
सुप्रसन्नमुखाम्भोजं सुस्मितं पल्लवाधरम् ।
सुन्दरं सुन्दरापाङ्गं भोगिभोगभुजद्वयम् ।।५३।।

भक्तानुग्राहकं देवं जामदग्न्यं जगत्पतिम् ।
ध्यायन्तमात्मनात्मानं ध्यायेत्प्रणतवत्सलम् ।।५४।।

अथ द्वादशभिः पुण्यैर्नामभिः पापहारिभिः ।
जपतामिष्टदैर्भृत्यपारिजातं समर्चयेत् ।।५५।।

जामदग्न्यो जगन्नेता ब्रह्मण्यो ब्रह्मवत्सलः ।
कार्तवीर्यकुलोच्छेत्ता क्षत्रवंशप्रतापनः ।।५६।।

विश्वजिद्दीक्षितो रामः कश्यपाशासुरद्रुमः ।
परश्वधधरः शान्तो महेन्द्रकृतकेतनः ।।५७।।

एतैर्द्वादशभिर्दिव्यैर्गोप्यैरभ्यर्च्य नामाभिः ।
उपतिष्ठेत्पुनर्गुह्यैर्मुख्यैर्नामभिरीश्वरम् ।
क्षिप्रप्रसादजननैश्चतुर्वर्गफलोदयेः ।।५८।।

हन्त ते संप्रवक्ष्यामि तान्यपि प्रणतासि यत् ।
इमानि गौरि नामानि सुगोप्यानि सतामपि ।।५९।।

ॐ हंसस्त्रयीमयो धाता योगीन्द्रहृदयालयः ।
विधामा विराणतातस्त्रिमर्तिस्त्रिजगन्मयः ।।६०।।

नारायणः परं ब्रह्म परं तत्त्वं परात्परः ।
भार्गवो धर्मचरणो भर्गरूपः सतां गतिः ।।६१।।

इति षोडशभिः स्तुत्वा नामभिर्ऋषिपुंगवम् ।
सर्वाशिषां पतिं देवं सकलाभीष्टदायकैः ।।६२।।

आत्मानं विन्यसेदङ्गेष्वनेन कवचेन सः ।
मृगीमुद्रिकया धीमान्वज्रसारेण सारवित् ।।६३।।

दशवारं प्रतिदिनं मासमेकं समाचरेत् ।
स्वप्ने पश्चति देवेशं भार्गवं भृगुनन्दनम् ।।६४।।

चिन्तितार्थप्रदं सौम्यं चिन्तामणिमिवापरम् ।
मासत्रयं तु विन्यस्ते साक्षात्पश्यति जापकः ।।६५।।

मनसः संप्रसादेन लब्ध्वा वरमनुत्तमम् ।
अणिमादिगुणेर्युक्तो ब्रह्मलोकमवान्पुयात् ।।६६।।

अथवा योगसिद्धिं यो धातुसिद्धिं च वाञ्छति ।
कुरुक्षेत्रे महेन्द्रे वा जपेदयुतमात्मवान् ।।६७।।

सर्वाश्वौषधयस्तस्य खेचरत्वादिसिद्धिदाः ।
रससिद्धिप्रदाश्चापि सिध्यन्त्यस्य न संशयः ।।६८।।

महेन्द्राद्रिरिव क्षेत्रं सिद्धिदं नास्ति भूतले ।
जामदग्न्य इवान्योऽस्ति न देवो भृत्यवत्सलः ।।६९ ।।

प्रस्फुरग्दुणसौवर्णराशीनां जन्मभूः परः ।
तथेदमिव वर्मान्यद्धर्मादिफलदं न हि ।।७०।।

कवचेऽस्मिन्सकृज्जप्ते मन्त्रावृत्तिसहस्त्रजम् ।
फलमाप्नोत्यविकलं तस्मान्नित्यं जपेन्नरः ।।७१।।

अमन्वी वापि मन्वी वा भार्गवे भक्तिमान्नरः ।
जपेन्नित्यमिदं वर्म मन्वसिद्धिमवान्पुयात् ।।७२।।

सारस्वतमिदं देवि कवचं वाक्प्रदं नृणाम् ।
मूकोऽपि वाग्मी भवति जपन्नेतग्दुरूर्यथा ।।७३।।

नित्यं परश्वधमृतः कवचस्यास्य धारणात् ।
सभासु वदतां श्रेष्ठो राज्ञां भवति च प्रियः ।।७४।।

वैदिकं तान्त्रिकं चैव मान्त्रिकं ज्ञानमुत्तमम् ।
कवचस्यास्य जापी तु ब्रह्मज्ञानं च विन्दति ।।७५।।

इत्येतदुक्तं कवचं मया हैहयाविद्विषः ।
गोपनीयमिदं देवि ममात्मासि मणिर्यथा ।।७६।।

धन्यं यशस्यमायुष्यं श्रीकरं पुष्टिवर्धनम् ।
जपतां कवचं नित्यं सर्वसौभाग्यपूरितम् ।।७७।।

इति श्रीविष्णुयामले उपरिभागे जामदग्न्यदिव्याञ्जनसिद्धि-
कल्पे त्रयस्त्रिंशत्पटलः ।। श्रीभार्गवार्पणमस्तु ।।

।। श्रीभार्गवकवचं संपूर्णम् ।।